# .. tArAkavacham ..

# ॥ તારાકવચમ્ ॥

## Document Information

Text title : taaraakavacham

File name : taaraakavach.itx

Category : kavacha

Location : doc_devii

Author : Traditional

Language : Sanskrit

Subject : philosophy/hinduism/religion

Transliterated by : Ravin Bhalekar ravibhalekar at hotmail.com

Proofread by : Ravin Bhalekar ravibhalekar at hotmail.com

Description-comments : rudrayAmaletantre

Latest update : March 02, 2006

Send corrections to : Sanskrit@cheerful.com

Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted for promotion of any website or individuals or for commercial purpose without permission.

Please help to maintain respect for volunteer spirit.

August 3, 2016

*sanskritdocuments.org*

# ॥ તારાકવચમ્ ॥

શ્રીગણેશાય નમઃ ।
ઈશ્વર ઉવાચ ।
કોટિતન્ત્રેષુ ગોપ્યા હિ વિદ્યાતિભયમોચિની ।
દિવ્યં હિ કવચં તસ્યાઃ શ્રૃણુષ્વ સર્વકામદમ્ ॥ ૧॥

અસ્ય તારાકવચસ્ય અક્ષોભ્ય ઋષિઃ , ત્રિષ્ટુપ્ છન્દઃ ,
ભગવતી તારા દેવતા , સર્વમન્ત્રસિદ્ધિસમૃદ્ધયે જપે વિનિયોગઃ ।
પ્રણવો મે શિરઃ પાતુ બ્રહ્મરૂપા મહેશ્વરી ।
લલાટે પાતુ હ્રીંકારો બીજરૂપા મહેશ્વરી ॥ ૨॥

સ્ત્રીંકારો વદને નિત્યં લજ્જારૂપા મહેશ્વરી ।
હૂઁકારઃ પાતુ હૃદયે ભવાનીરૂપશક્તિધૃક્ ॥ ૩॥

ફટ્કારઃ પાતુ સર્વાઙ્ગે સર્વસિદ્ધિફલપ્રદા ।
ખર્વા માં પાતુ દેવેશી ગણ્ડયુગ્મે ભયાપહા ॥ ૪॥

નિમ્નોદરી સદા સ્કન્ધયુગ્મે પાતુ મહેશ્વરી ।
વ્યાઘ્રચર્માવૃતા કટ્યાં પાતુ દેવી શિવપ્રિયા ॥ ૫॥

પીનોન્નતસ્તની પાતુ પાર્શ્વયુગ્મે મહેશ્વરી ।
રક્તવર્તુલનેત્રા ચ કટિદેશે સદાઽવતુ ॥ ૬॥

લલજ્જિહ્વા સદા પાતુ નાભૌ માં ભુવનેશ્વરી ।
કરાલાસ્યા સદા પાતુ લિઙ્ગે દેવી હરપ્રિયા ॥ ૭॥

પિઙ્ગોગ્રૈકજટા પાતુ જઙ્ઘાયાં વિઘ્નનાશિની ।
પ્રેતખર્પરભૃદ્દેવી જાનુચક્રે મહેશ્વરી ॥ ૮॥

નીલવર્ણા સદા પાતુ જાનુની સર્વદા મમ ।
નાગકુણ્ડલધર્ત્રી ચ પાતુ પાદયુગે તતઃ ॥ ૯॥

નાગહારધરા દેવી સર્વાઙ્ગં પાતુ સર્વદા ।
નાગકઙ્કધરા દેવી પાતુ પ્રાન્તરદેશતઃ ॥ ૧૦॥

ચતુર્ભુજા સદા પાતુ ગમને શત્રુનાશિની ।
ખડ્ગહસ્તા મહાદેવી શ્રવણે પાતુ સર્વદા ॥ ૧૧॥

નીલામ્બરધરા દેવી પાતુ માં વિઘ્નનાશિની ।
કર્ત્રિહસ્તા સદા પાતુ વિવાદે શત્રુમધ્યતઃ ॥ ૧૨॥

બ્રહ્મરૂપધરા દેવી સઙ્ગ્રામે પાતુ સર્વદા ।

નાગકઙ્કણધર્ત્રી ચ ભોજને પાતુ સર્વદા ॥ ૧૩ ॥

શવકર્ણા મહાદેવી શયને પાતુ સર્વદા ।
વીરાસનધરા દેવી નિદ્રાયાં પાતુ સર્વદા ॥ ૧૪॥

ધનુર્બાણધરા દેવી પાતુ માં વિઘ્નસઙ્કુલે ।
નાગાઞ્ચિતકટી પાતુ દેવી માં સર્વકર્મસુ ॥ ૧૫॥

છિન્નમુણ્ડધરા દેવી કાનને પાતુ સર્વદા ।
ચિતામધ્યસ્થિતા દેવી મારણે પાતુ સર્વદા ॥ ૧૬॥

દ્વીપિચર્મધરા દેવી પુત્રદારધનાદિષુ ।
અલઙ્કારાન્વિતા દેવી પાતુ માં હરવલ્લભા ॥ ૧૭॥

રક્ષ રક્ષ નદીકુઞ્જે હૂં હૂં ફટ્ સુસમન્વિતે ।
બીજરૂપા મહાદેવી પર્વતે પાતુ સર્વદા ॥ ૧૮॥

મણિભૃદ્વજ્રિણી દેવી મહાપ્રતિસરે તથા ।
રક્ષ રક્ષ સદા હૂં હૂં ૐ હ્રીં સ્વાહા મહેશ્વરી ॥ ૧૯॥

પુષ્પકેતુરજાર્હેતિ કાનને પાતુ સર્વદા ।
ૐ હ્રીં વજ્રપુષ્પં હું ફટ્ પ્રાન્તરે સર્વકામદા ॥ ૨૦॥

ૐ પુષ્પે પુષ્પે મહાપુષ્પે પાતુ પુત્રાન્મહેશ્વરી ।
હૂં સ્વાહા શક્તિસંયુક્તા દારાન્ રક્ષતુ સર્વદા ॥ ૨૧॥

ૐ આં હૂં સ્વાહા મહેશાની પાતુ દ્યૂતે હરપ્રિયા ।
ૐ હ્રીં સર્વવિઘ્નોત્સારિણી દેવી વિઘ્નાન્માં સદાઽવતુ ॥ ૨૨॥

ૐ પવિત્રવજ્રભૂમે હુંફટ્સ્વાહા સમન્વિતા ।
પૂરિકા પાતુ માં દેવી સર્વવિઘ્નવિનાશિની ॥ ૨૩ ॥

ૐ આઃ સુરેખે વજ્રરેખે હુંફટ્સ્વાહાસમન્વિતા ।
પાતાલે પાતુ સા દેવી લાકિની નામસંજ્ઞિકા ॥ ૨૪॥

હ્રીંકારી પાતુ માં પૂર્વે શક્તિરૂપા મહેશ્વરી ।
સ્ત્રીંકારી પાતુ દેવેશી વધૂરૂપા મહેશ્વરી ॥ ૨૫॥

હૂંસ્વરૂપા મહાદેવી પાતુ માં ક્રોધરૂપિણી ।
ફટ્સ્વરૂપા મહામાયા ઉત્તરે પાતુ સર્વદા ॥ ૨૬॥

પશ્ચિમે પાતુ માં દેવી ફટ્સ્વરૂપા હરપ્રિયા ।
મધ્યે માં પાતુ દેવેશી હૂંસ્વરૂપા નગાત્મજા ॥ ૨૭॥

નીલવર્ણા સદા પાતુ સર્વતો વાગ્ભવા સદા ।

ભવાની પાતુ ભવને સર્વૈશ્વર્યપ્રદાયિની ॥ ૨૮॥

વિદ્યાદાનરતા દેવી વક્ત્રે નીલસરસ્વતી ।
શાસ્ત્રે વાદે ચ સઙ્ગ્રામે જલે ચ વિષમે ગિરૌ ॥ ૨૯॥

ભીમરૂપા સદા પાતુ શ્મશાને ભયનાશિની ।
ભૂતપ્રેતાલયે ઘોરે દુર્ગમા શ્રીઘનાઽવતુ ॥ ૩૦॥

પાતુ નિત્યં મહેશાની સર્વત્ર શિવદૂતિકા ।
કવચસ્ય માહાત્મ્યં નાહં વર્ષશતૈરપિ ॥ ૩૧॥

શક્નોમિ ગદિતું દેવિ ભવેત્તસ્ય ફલં ચ યત્ ।
પુત્રદારેષુ બન્ધૂનાં સર્વદેશે ચ સર્વદા ॥ ૩૨॥

ન વિદ્યતે ભયં તસ્ય નૃપપૂજ્યો ભવેચ્ચ સઃ ।
શુચિર્ભૂત્વાઽશુચિર્વાપિ કવચં સર્વકામદમ્ ॥ ૩૩॥

પ્રપઠન્ વા સ્મરન્મર્ત્યો દુઃખશોકવિવર્જિતઃ ।
સર્વશાસ્ત્રે મહેશાનિ કવિરાડ્ ભવતિ ધ્રુવમ્ ॥ ૩૪॥

સર્વવાગીશ્વરો મર્ત્યો લોકવશ્યો ધનેશ્વરઃ ।
રણે દ્યૂતે વિવાદે ચ જયસ્તત્ર ભવેદ્ ધ્રુવમ્ ॥ ૩૫॥

પુત્રપૌત્રાન્વિતો મર્ત્યો વિલાસી સર્વયોષિતામ્ ।
શત્રવો દાસતાં યાન્તિ સર્વેષાં વલ્લભઃ સદા ॥ ૩૬॥

ગર્વી ખર્વી ભવત્યેવ વાદી સ્ખલતિ દર્શનાત્ ।
મૃત્યુશ્ચ વશ્યતાં યાતિ દાસાસ્તસ્યાવનીભુજઃ ॥ ૩૭॥

પ્રસઙ્ગાત્કથિતં સર્વં કવચં સર્વકામદમ્ ।
પ્રપઠન્વા સ્મરન્મર્ત્યઃ શાપાનુગ્રહણે ક્ષમઃ ॥ ૩૮॥

આનન્દવૃન્દસિન્ધૂનામધિપઃ કવિરાડ્ ભવેત્ ।
સર્વવાગિશ્વરો મર્ત્યો લોકવશ્યઃ સદા સુખી ॥ ૩૯॥

ગુરોઃ પ્રસાદમાસાદ્ય વિદ્યાં પ્રાપ્ય સુગોપિતામ્ ।
તત્રાપિ કવચં દેવિ દુર્લભં ભુવનત્રયે ॥ ૪૦॥

ગુરુર્દેવો હરઃ સાક્ષાત્તત્પત્ની તુ હરપ્રિયા ।
અભેદેન ભજેદ્યસ્તુ તસ્ય સિદ્ધિર્દૂરતઃ ॥ ૪૧॥

મન્ત્રાચારા મહેશાનિ કથિતાઃ પૂર્વવત્પ્રિયે ।
નાભૌ જ્યોતિસ્તથા રક્તં હૃદયોપરિ ચિન્તયેત્ ॥ ૪૨॥

ઐશ્વર્યં સુકવિત્વં ચ મહાવાગિશ્વરો નૃપઃ ।

નિત્યં તસ્ય મહેશાનિ મહિલાસઙ્ગમં ચરેત્ ॥ ૪૩ ॥

પઞ્ચાચારરતો મર્ત્યઃ સિદ્ધો ભવતિ નાન્યથા ।
શક્તિયુક્તો ભવેન્મર્ત્યઃ સિદ્ધો ભવતિ નાન્યથા ॥ ૪૪॥

બ્રહ્મા વિષ્ણુશ્ચ રુદ્રશ્ચ યે દેવાસુરમાનુષાઃ ।
તં દૃષ્ટ્વા સાધકં દેવિ લજ્જાયુક્તા ભવન્તિ તે ॥ ૪૫॥

સ્વર્ગે મર્ત્યે ચ પાતાલે યે દેવાઃ સિદ્ધિદાયકાઃ ।
પ્રશંસન્તિ સદા દેવિ તં દૃષ્ટ્વા સાધકોત્તમમ્ ॥ ૪૬॥

વિઘ્નાત્મકાશ્ચ યે દેવાઃ સ્વર્ગે મર્ત્યે રસાતલે ।
પ્રશંસન્તિ સદા સર્વે તં દૃષ્ટ્વા સાધકોત્તમમ્ ॥ ૪૭॥

ઇતિ તે કથિતં દેવિ મયા સમ્યક્પ્રકીર્તિતમ્ ।
ભુક્તિમુક્તિકરં સાક્ષાત્કલ્પવૃક્ષસ્વરૂપકમ્ ॥ ૪૮॥

આસાદ્યાદ્યગુરું પ્રસાદ્ય ય ઇદં કલ્પદ્રુમાલમ્બનં
મોહેનાપિ મદેન ચાપિ રહિતો જાડ્યેન વા યુજ્યતે ।
સિદ્ધોઽસૌ ભુવિ સર્વદુઃખવિપદાં પારં પ્રયાત્યન્તકે
મિત્રં તસ્ય નૃપાશ્ચ દેવિ વિપદો નશ્યન્તિ તસ્યાશુ ચ ॥ ૪૯॥

તદ્ગાત્રં પ્રાપ્ય શસ્ત્રાણિ બ્રહ્માસ્ત્રાદીનિ વૈ ભુવિ ।
તસ્ય ગેહે સ્થિરા લક્ષ્મીર્વાણી વક્ત્રે વસેદ્ ધ્રુવમ્ ॥ ૫૦॥

ઇદં કવચમજ્ઞાત્વા તારાં યો ભજતે નરઃ ।
અલ્પાયુર્નિર્દ્ધનો મૂર્ખો ભવત્યેવ ન સંશયઃ ॥ ૫૧॥

લિખિત્વા ધારયેદ્યસ્તુ કણ્ઠે વા મસ્તકે ભુજે ।
તસ્ય સર્વાર્થસિદ્ધિઃ સ્યાદ્યદ્યન્મનસિ વર્તતે ॥ ૫૨॥

ગોરોચનાકુઙ્કુમેન રક્તચન્દનકેન વા ।
યાવકૈર્વા મહેશાનિ લિખેન્મન્ત્રં સમાહિતઃ ॥ ૫૩ ॥

અષ્ટમ્યાં મઙ્ગલદિને ચતુર્દશ્યામથાપિ વા ।
સન્ધ્યાયાં દેવદેવેશિ લિખેદ્યન્ત્રં સમાહિતઃ ॥ ૫૪॥

મઘાયાં શ્રવણે વાપિ રેવત્યાં વા વિશેષતઃ ।
સિંહરાશૌ ગતે ચન્દ્રે કર્કટસ્થે દિવાકરે ॥ ૫૫॥

મીનરાશૌ ગુરૌ યાતે વૃશ્ચિકસ્થે શનૈશ્ચરે ।
લિખિત્વા ધારયેદ્યસ્તુ ઉત્તરાભિમુખો ભવેત્ ॥ ૫૬॥

શ્મશાને પ્રાન્તરે વાપિ શૂન્યાગારે વિશેષતઃ ।

નિશાયાં વા લિખેન્મન્ત્રં તસ્ય સિદ્ધિરચઞ્ચલા ॥ ૫૭॥
ભૂર્જપત્રે લિખેન્મન્ત્રં ગુરુણા ચ મહેશ્વરિ ।
ધ્યાનધારણયોગેન ધારયેદ્યસ્તુ ભક્તિતઃ ॥ ૫૮॥
અચિરાત્તસ્ય સિદ્ધિઃ સ્યાન્નાત્ર કાર્યા વિચારણા ॥ ૫૯॥
॥ ઇતિ શ્રીરુદ્રયામલે તન્ત્રે ઉગ્રતારાકવચં સમ્પૂર્ણમ્ ॥

Encoded and Proofread by Ravin Bhalekar ravibhalekar@hotmail.com

.. tArAkavacham ..
was typeset on August 3, 2016

Please send corrections to *sanskrit@cheerful.com*